# .. shAstArchanA ..

## ॥ शास्तार्चना ॥

श्री अथ भूतनाथ (अय्यप्प) स्वामिनः सुप्रभातं
श्री गणेशाय नमः ।
श्रीकण्ठपुत्र हरिनन्दन विश्वमूर्ते
लोकैकनाथ करुणाकर चारुमूर्ते ।
श्रीकेशवात्मज सुमनोहर सत्यमूर्ते
श्री भूतनाथ भगवन् तव सुप्रभातम् ॥ १॥
श्रीविष्णु रुद्र सुत मङ्गळ कोमलाङ्ग
देवाधिदेव जगदीश सरोजनेत्र ।
कान्तारवास सुरमानव वृन्दसेव्य
श्री भूतनाथ भगवन् तव सुप्रभातम् ॥ २॥
आशानुरूपफलदायक का०तमूर्ते
ईशानकेशवसुत मणिकण्ठ सुदिव्यमूर्ते ।
भक्तेशभक्त हृदयस्ति त भूमिपाल
श्री भूतनाथ भगवन् तवसुप्रभातम् ॥ ३॥
सत्य स्वरूप सकलेश गुणार्णवेश
मर्त्यस्वरूप वरदेश रमेशसूनो ।
मुक्तिप्रद त्रिदशराज मुकुन्दसूनो
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ ४॥
कालारिपुत्र वहिषेमदनाशन श्री
कैलासवास शबरीश्वर धन्यमूर्ते ।
नीलाम्बराभरण शोभित सुन्दराङ्ग
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ ५॥
नारायणात्मज परात्पर दिव्यरूप
वाराणसीश, शिवनन्दन काव्यरूप ।
गौरीशपुत्र पुरुषोत्तम बालरूप
श्रीभूतनाथ, भगवान् तवसुप्रभातम् ॥ ६॥
त्रैलोक्यनाथ गिरिवास वनेनिवास
भूलोकवास भुवनाधिपदास देव ।
वेलायुधप्रिय सहोदर शम्भुसूनो
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ ७॥
आनन्दरूप। करधारित चापबाण
ज्ञानस्वरूप, गुरुनाथ, जगन्निवास ।

ज्ञानप्रदायक जनार्दन नन्दनेश
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ ८ ॥
अम्भोजनाथ सुतसुन्दर धन्य मर्ते
शम्भुप्रियाकलितपुण्य पुराणमूर्ते ।
इन्द्रादि देवगणवन्दित ब्रह्मचारिन्
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ ९ ॥
देवेश देवगुणपूरित भाग्यमूर्ते
श्रीवासुदेवसुत पावन भक्तबन्धो ।
सर्वेश सर्वमनुजार्चित दिव्यमूर्ते
श्रीभूतनाथ भगवन् तवसुप्रधातम् ॥ १० ॥
नारायणात्मज सुरेश नरेशभक्त
लोकेश केशवशिवात्मज भूतनाथ ।
श्रीनारदादि मुनिपुङ्गव पूजितेश
श्रीभूतनाथ भगवन् तवस्तुप्रभातम् ॥ ११ ॥
आनन्दरूप सुरसुन्दर देहधारिन्
शर्वात्मज सुगरीश सुरालयेश ।
नित्यात्मसौख्यवरदायक देवदेव
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ १२ ॥
सर्वेश सर्वमनुजार्जित सर्वपाप
संहारकारक चिदात्मक रुद्रसूनो ।
सर्वेश सर्वगुण पूर्ण कृपाम्बुराशे
श्रीभूतनाथ भगवन्, तवसुप्रभातम् ॥ १३ ॥
ओङ्काररूप जगदीश्वर भक्त बन्धो
पङ्केतुहाक्ष पुरुषोत्तम कर्मसाक्षिन् ।
माङ्गल्य रूप मणिकण्ठ मनोभिराम
श्रीभूतनाथ भगवन् तवसुप्रभातम् ॥ १४ ॥

अथ महाशास्तु कवचं प्रारभ्यते ॥
अस्य श्री महाशास्तुः कवचस्तोत्र महामन्त्रस्य ब्रह्मा ऋषिः ।
गायत्री छन्दः । महाशास्त्रादेवता । ह्याम्बीजम् । प्रीं शक्तिः ।
हूं कीलकं श्रीमहाशास्त्र प्रसादसिद्ध्यर्थे जपेविनियोगः ।
ह्यां इत्यादिषडङ्गानि ॥
अथ ध्यानम् ।
तेजोमण्डलमध्यगं त्रिनयनं दिव्याम्बरालङ्कृतं

देवं पुष्टशरे-कुकार्मुकलस माणिक्य पात्राभयम् ।
बिभ्राणं करपङ्कजे मदगज स्कन्दाधिरूढं विभुं
शास्तारं शरणं भजामि सततं त्रैलोक्य सम्मोहनम् ॥
महाशास्ताशिरः पातु फालं हरिहरात्मजः ।
कामरूपी दृशौ पातु सर्वज्ञमे श्रुती सदा ॥१॥
घ्राणम्पातु कृपाध्यक्ष मुखं गौरीप्रियः सदा ।
वेदाध्यायेच मे जिह्वां पातुमे चिबुकं गुरुः ॥२॥
कण्ठम्पातु विशुद्धात्मा स्व०दौ पातु सुरार्चितः ।
बाहूपातु विरूपाक्ष करौ तु कमलाप्रियः ॥३॥
भूताधिपोमे हृदयं मध्यम्पातु महाबलः ।
नाभिम्पातु महावीरः कमलाक्षेस् नतात्कटम् ॥४॥
अपानपातु विश्वात्मागुह्यं गुह्यार्थवित्तमः ।
ऊरूपातु गजारूढ वज्रधारी च जानुनी ॥५॥
जम्पेपात्वं कुशधरः पादौ पातु महामतिः ।
सर्वाङ्गम्पातु मे नित्यं महामाया विशारदः ॥६॥
इतीदं कवचं पुण्यं सर्वाफ्घनिकृन्तनम् ।
महाव्याधि प्रशमनं महापातक नाशनम् ॥७॥
ज्ञानवैराग्यदं दिव्यमणिमादि विभूषितं
आयुरारोग्य जननं महावश्यकरं परम् ॥८॥
यं यं कामयते कामं तन्तं प्राप्र्?इत्य संशयः ।
त्रिसन्ध्यं यः पठेद्विद्वान् स याति परमां गतिम् ॥९॥

इति महाशास्त्र कवचं सम्पूर्णम् ।

॥ शास्तुः ध्यानाष्टकं प्रारभ्यते ॥
नमामि धर्मशास्तारं योगपीठस्ति तं विभुम् ।
प्रसन्नं निर्मलं शान्तं सत्य धर्मऽव्रतम्भजे ॥१॥
आश्यानु कोमल विशालतनुं विचित्रवासो
वसान मरणोत्सलवामहस्तम् ।
उत्तुङ्गरत्न मुकुः टं कुटिलाग्र केशं
शास्तारमिष्ट वरदं शरणं प्रपद्य ॥२॥
हरिहरशरीरजन्मा मरकतमणिभङ्गवेच कच्छायम् ।
विजयतुः देवः शास्ता सकलजगच्चित्त मोहिनी मर्तिः ॥३॥
पार्श्वस्ता पत्यदारंग्वटिविटपितलव्यस्त सिंहासनस्स०श्यामं
कालाम्बरञ्च तकरयुगलादर्श चिन्तामणिं च

शनिप्रिंशबाणासन विशिखद्ध तं रक्तमाल्यानुलेपंवन्दे
शास्तारमिड्यं घन कुटिल बृहत्तु तलोदग्रमौळिम् ॥ ४॥
गारालविसारिकुन्तलधरं सिंहासनाध्यासिनं
स्रजत्पत्रसुकृप कुण्डलमधेष्टि ष्टा सभ्य दर्द्धयं!
नीलक्स्मवसं नवीनजलदश्यामं प्रभासत्यकस्वायत्पार्श्वयुगं
सुरक्तसकलाकल्पंस्मरेदार्यकम् ॥ ५॥
कोदण्डंसशरम्भुजेनभुजगेन्द्राभोगभासावहन्
नानेन कुरिकां विपक्षदलने पक्षेण दक्षेण च ।
कान्त्या निर्जितनीरदः पुरभिदः क्रीडराताकृते
पुस्माकमनल्प निर्मलयशाः निर्मातु शर्मानिशम् ॥ ६॥
काळाम्भोद कलाभ कोमलतनुं बालेन्दुचूडंविभुं
बालार्कायुतरोचिषं शरलसत्तोदण्डपाणा
तं वीर रमणं रणोतु कमिषद्राम्बुभूषाञ्जलिं
कालारातिसुतं किरातवपुषं वन्देपरं दैवतम् ॥ ७॥
साध्यं स्व पार्श्वन विबुद्ध गाढं निपातयन्तं खलुसाधकस्य ।
पादबयोर्मण्डधरं त्रिनेत्रं भजेनु शास्तारमभीष्ट सिद्ध ॥ ८॥
॥ इति ध्यानाष्टकं सम्पूर्णम् ॥

॥ शास्तुः गीताष्टकम् ॥
हरिवरासनं विश्वमोहनं
हरिदधीश्वराराध्य पादुकम् ।
अरिविमर्दनं नित्यनर्तनं
हरिहरात्मजं देवमाश्रये ॥ १॥
शरण कीर्तनं शक्तमानसं
भरणलोलुपं नर्तनालसम् ।
अरुणभासुरं भूतनायकं
हरिहरात्मजं देवमाश्रये ॥ २॥
प्रणय सत्यकं प्राणनायकं
प्रणतकल्पकं सुप्रभाञ्चितम् ।
प्रणवमन्दिरं कीर्तनप्रियं
हरिहरात्मजं देवमाश्रये ॥ ३॥
तुरगवाहनं सुन्दरानन
नरगदायुधं देववर्णितम् ।
गुरुकृपाकरं कीर्तनप्रियं

हरिहरात्मजं देवमाश्रये ॥ ४॥
त्रिभुवनार्चितं देवतात्मक
त्रिनयनं प्रभुं दिव्यदेशिकम् ।
त्रिदशपूजितं चिन्तित प्रदं
हरिहरात्मजं देवमाश्रये ॥ ५॥
भवसयापहं भावुकावहन्त
भुवनमोहनं भूतिभूषणम् ।
धवळवाहनं दिव्यवारणं
अहरिहरात्मजं देवमाश्रये ॥ ६॥
कलम्म दुस्मितं सुन्दराननं
कलभकोवलं गात्रमोहनम् ।
कलभ-केसरी-वाजि-वाहनं
हरिहरात्मजं देवमाश्रये ॥ ७॥
श्रितजनप्रियं चिन्तित प्रदं
श्रुतिविभूषणं साधुजीवनम् ।
श्रुतिमनोहरं गीतलालसं
हरिहरात्मजं देवमाश्रये ॥ ८॥
इति श्रीमद्दरिहरपुत्र गीताष्टकं सम्पूर्णम् ॥

श्रीः ॥
श्रीगणेशाय नमः । किरातशास्त्र नमः ॥
अथ किराताष्टकम् ॥
प्रत्यर्थि-वात-वक्षःस्थल-रुधिरसुरापान-मत्ता सृषत्नं
चापे सन्धाय तिष्ठन् हृदयसरसिजे मानके तापहं तम् ।
पिम्भोत्तंसः शरण्यः पशुपति तनयो नीरदाभः प्रसन्नो
देवः पायादायात् शबरनपु -रसौसावधानः सदानः ॥ १॥
आखेटाय वनेचरस्य गिरिजा सस्य शम्भोः सुतः
तातुं यो भुवनं पुरा समजनि ख्यातः किरातकृतिः ।
कोदण्ड कुरिकाधरो घनरवः पिञ्छः वतंसोज्वलः
स त्वं मा मव सर्वदा रिपुगणत्रस्तं दयावारिध ॥ २॥
यो मां पीडयति प्रसह सततं देहीत्यनन्नाश्रयं
भित्ता तस्य रिपोरुरः कुरिकया शाताग्र या दुर्मतेः ।
देव त्वरपङ्कजोल्लसितया श्रीमति राताकृते
तत्साणान् वितरा० ातकाय भगवन् कालारिपुत्रार्जसा ॥ ३॥
विवर्मसु दुर्वचोभि रसतां सन्तप्त शल्यूषमै

दृ पाना०द्वि षतामशान्त मनसां खिन्नोस्स्मियावध्रशम् ।
ताव कुरिकाशरासनधर शिवमाविर्भवन्
स्वामि देव किरातरूप शमय प्रत्यर्थिगर्वं क्षणात् ॥ ४ ॥
हर्तुं वित्तमधर्मतो ममता शआश्च ये दुर्जनाः
तेषां मर्मसु ताडयाशु विशिखैता र्मुकान्नि सृतैः ॥
शास्तारं द्विषता० किरातवपुषं सर्वार्थदं त्या मृते
पश्याम्यत्र पुरारिपुत्र शरणं नान्यं प्रपन्न्??अम् ॥ ५ ॥
यक्षः प्रेतपिशाचभूतनिवहाः दुःखप्रदा भीषणाः
बादन्ते नरशोणितोत्तु कधियो ये मां रिपुप्रेरिताः ।
चाप ज्या-निनद्द??विनाश सकलान् संहृत्य दुष्टग्रहान्
गौरीशात्मज दैवतेश्वर किरातकार संरक्षमाम् ॥ ६ ॥
दोह्नु ं येनिरताः त्वमद्य पदपद्मकान्त भक्ताय मे
माया छिन्न कळेबरा श्रु विषदानादैः सदा कर्मभिः ।
वश्य स्तम्भन मारणादि। कुशल-प्रारम्भदक्षानरीन्
दुष्टान् संहर देवदेव शबराकार त्रिलोकेश्वर ॥ ७ ॥
तन्ना ना मनसा गिरापि सततं दोषं चिकीर्षत्यलं
त्वत्पादप्रणतस्य निरपराधस्यासि ये मानवाः ।
सर्वान् संहर तान् गिरीशसुत मे तापत्र मौघानपि
त्या मेकं शबराकृते भयहरं नाथं प्रपना्अम् ॥ ८ ॥
क्लिष्टो राजभटैस्त दापि परिभूतोहं खलै र्व्यरिभिः
चानैघोरतरैर्विसज्ज लनिधे मगोस्मि दुःखातुरम् ।
हा हा किङ्करवै विभो शबरवेषन्तामभीष्टार्थदं
वन्देहं परदैवतं कुरुकृपानाथार्तबन्धोऽमयि ॥ ९ ॥
स्तोत्रं यः प्र जपेत्, प्रशान्त करण्यर्नित्यं किराताष्टकं
सक्षिप्रं वशगान् करोति नृपतीनाबद्ध वैरानपि ।
सङ्कृत्यात्मविरोधिनः खलजनान् दुष्टग्रहानस्
यात्यन्ते यमदूत भीतिरहितो दिव्याङ्गतिं शाश्वतीम् ॥ १० ।
॥ इति श्री किराताष्टकं सम्पूर्णम् ॥

हरिहरपुत्र (अय्यप्प) स्वामिनः श्रीमत्परहंसपरिव्राजकाचार्यवर्य
श्रीमच्चङ्कराचार्यविरचितं स्तुति दशकम् ।
श्रीमहागणपतये नमः ।
आशानुरूपफलद चरणारविन्द
भाजा-मपार-करुणार्णव पूर्णचन्द्रम् ।
नाशाय सर्वविपदामपि नौमिनित्यं

ईशान क्रेशवभुवं भुवनैकनाथम् ॥ १॥
पिञ्छावली वलयिता क्वलितु प्रसूनः
सञ्जात क्रान्तिभरःभासुर केशभारम् ।
शिञ्जान। मञ्जुमणि भूषर्णअञ्जिताङ्गं
चन्दावतंस्अरिनन्दन। माश्रयामि ॥ २॥
आलोल नील ललिता लक- भार्रअन्न
आकन्नुनास-वरुणाधर -मायताक्षम् ।
आलम्बनं त्रिजगतां प्रमथाधिनाथ
मानव लोक हरिनन्दन?माश्रयामि ॥ ३॥
कर्णावलम्बि- मणिकुण्डल-भासवान
गण्डस्थलं समुदितानन- पुण्डरीकम् ।
अर्णोजनाभ-हरयो-रिव मूर्तियन्तं
पुण्यातिरेकविव भूतपतिं नमामः ॥ ४॥
उद्दण्ड-चारु-भुजदण्डयुगा-ग्र संस्थ
कोदण्ड बाणवहितं तननन्तवीर्य ।
उद्यत्सभापटलदीप्र मदभ्र सारं
नित्यं प्रभापति-महं प्रणतो भवामि ॥ ५॥
मालेय पङ्क-समलङ्कृत भासमान
दूरन्तराळ तरळामल-हारजालम् ।
नीलांइर्मल दुकूलधरं मुकुन्द
कालान्तक प्रतिनिधिं प्रणतोस्मि नित्यम् ॥ ६॥
यत्पादपङ्कजयुगं मुनयोस्स्य जस्रं
भक्ताभजन्ति भवरोग निवारणाय ।
पुत्रं पुरान्तक नरान्तकि रुदारं
नित्यं नमाम्यहममित्र- कुलान्तकं तम् ॥ ७॥
कान्तं कलाय कुसुमद्यु ति-लोभनीय
कान्तिप्रवाहविलसत्कमनीय रूपम् ।
कान्तातनूज सहितं निखिलामय्घ
शान्तिप्रदं प्रमथनाथ महं नमामि ॥ ८॥
भूतेश भूरिकरुणामृत पूरपूर्ण
वारान्निधे परमभक्त जन्नकबन्धो ।
?? पायाद्भवास् प्रणत मेनमपार। घोर
संसार-भीत-मिह-मा-मखिलामयेभ्यः ॥ ९॥
१, हे भूतनाथ भगवन् भवदीयॅहारु
पादाम्बुजे भवतु भक्ति-रचञ्चला मे ।
नाथाय सर्वजगतां भजतां भवाबि

पोताय नित्य मखिलाङ्गभुवे नमस्त ॥ १० ॥

इति श्रीमच्छङ्कराचार्यवर्य विरचितं
हरिहरपुत्र स्तुतिदशकं सम्पूर्ण

---

Please send corrections to sanskrit@cheerful.com
Last updated June 2, 2018
http://sanskritdocuments.org